International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(3): 122-125
© 2026 IJMH
www.themultijournal.com
Received: 23-05-2026
Accepted: 16-06-2026
Publish : 17-06-2026

**लोकनाथपण्डा**
संविदाध्यापकः, मुक्तस्वाध्यायपीठम्,
श्रीभारतीतीर्थशास्त्रसमुत्कर्षकेन्द्रम्,
राजीवगान्धीपरिसरः,केन्द्रीयसंस्कृतवि-
श्वविद्यालयः, शृङ्गेरी,

**Correspondence:**
**लोकनाथपण्डा**
संविदाध्यापकः, मुक्तस्वाध्यायपीठम्,
श्रीभारतीतीर्थशास्त्रसमुत्कर्षकेन्द्रम्,
राजीवगान्धीपरिसरः,केन्द्रीयसंस्कृतवि-
श्वविद्यालयः, शृङ्गेरी,

# प्रसंख्यानम्

**लोकनाथपण्डा**

**शोधसारः-** श्रीमद्भगवत्पादशङ्कराचार्यसमर्थितस्य निर्विशेषब्रह्माद्वैतवादस्याचार्यप्रमुखेषु केषुचित् प्रसंख्यानविषये ऐकमत्यं नास्ति। आचार्यबादरायणमण्डनमिश्रवाचस्पतिमिश्रामलानन्दश्रीधरमधुसूदन-सरस्वतीप्रभृतयः प्रसंख्यानमङ्गीकुर्वन्ति। भगवत्पादश्रीशङ्कराचार्यसुरेश्वराचार्यानन्दगिरिप्रभृतयः प्रसंख्यानं नाद्रियन्ते। तद्विषयमाधारीकृत्य यथामति विवृयते।

**कूटशब्दाः-** प्रसंख्यानम्, विज्ञानम्, उपासना, प्रत्ययावृत्तिः, साक्षात्कारः, ध्यानमित्यादयः।

**भूमिका-** श्रीमण्डनमिश्रप्रभृतय एवमभिप्रयन्ति यद् दशमस्त्वमसि इति वाक्यजन्यबोधसाक्षात्कारवत् **"तत्त्वमसि"**[1] इत्यादिमहावाक्यादिना ब्रह्मसाक्षात्कारो न जायते; किन्तु महावाक्येन केवलं ब्रह्म विज्ञायते। तदनन्तरम् उपासनया ब्रह्म साक्षात्क्रियते। अत एव **"विज्ञाय प्रज्ञां कुर्वीत"**[2] इत्यादिश्रुतयः संगच्छन्ते। प्रज्ञाम् इत्यस्योपासनामित्यर्थः। इयमुपासना प्रसंख्यानशब्देनाभिधीयते। प्रसंख्यानार्थं च ध्यानभावनावृत्त्याम्रेडनचित्तैकाग्र्यप्रत्ययावृत्तिशब्दा ब्रह्मसिद्धौ बृहदारण्यकोपनिषद्भाष्यवार्तिके नैष्कर्म्यसिद्धौ श्रीमद्भगवद्गीतायाः नीलकण्ठीटीकायां च व्यवहृताः।

- **ब्रह्मसिद्धौ-** तिस्रश्च प्रतिपत्तयो ब्रह्मणि प्रथमा तावच्छब्दात्, अन्या शब्दात् प्रदिपद्य तत्सन्तानवतीध्यानभावनोपासनादिशब्दवाच्या, अन्या ततो लब्धनिष्पत्तिविगलितनिखिलविकल्प-साक्षात्करणरूपा।[i]
- **बृहदारण्यकोपनिषद्भाष्यवार्तिके-** आवृत्तिहि प्रसङ्ख्यानं शब्दबुद्ध्योरिति स्थितम्।[4] **अत्रानन्दगिरिः-** श्रवणमननयोरावृत्तिस्त्वया प्रसंख्यानमभ्युपेतम्।
- **नैष्कर्म्यसिद्धौ-** क. प्रसङ्ख्यानं नाम तत्त्वमस्यादिशब्दार्थान्वयव्यतिरेकयुक्तिविषयबुद्ध्याम्रेडन-मित्यभिधीयते, तच्चानुष्ठीयमानं प्रमितिवर्द्धनया परिपूर्णां प्रमितिं जनयति, न पुनरैकाग्र्यवद्ध नयेति।[5] ख. प्रसंख्यानस्य चित्तैकाग्र्यरूपस्य।[6]
- **श्रीमद्भगवद्गीतायाः नीलकण्ठीटीकायाम्-** प्रत्ययावृत्तिलक्षणं प्रसंख्यानम्।

**विषयप्रवेशः-**

एवमेव प्रसंख्यानेऽकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेधः समाधिरिति पातञ्जलयोगसूत्रे[7] योग-वार्तिककारेण प्रसंख्यानशब्दस्यार्थो विवेकसाक्षात्कारः कृतः। श्रीधनपतिना स्वीये श्रीम-द्भगवद्गीताव्याख्याने भाष्योत्कर्षे **"ज्ञानविज्ञाननाशनम्"**[8] इति गीतोक्तविज्ञानपदव्याख्याने **"विज्ञाय प्रज्ञां कुर्वीत"** इति बृहदारण्यकोपनिषदुक्तिमुद्धृत्य प्रज्ञाशब्दस्य निदिध्यासनरूपोऽर्थो निरूपितस्तत्रैव च निदिध्यासनमित्यस्य विवेकज्ञानमित्यर्थः कृतः। यथा-

**"ये तु ज्ञानम् आत्मविषयं विज्ञानं शास्त्रीयम्। यद्वा ज्ञानं शास्त्राचार्योपदेशजं विज्ञानं निदिध्यासनं विज्ञाय प्रज्ञां कुर्वीत इति श्रुतेरिति वर्णयन्ति, तेषां व्याख्याने प्रथमपक्षोऽरुचिग्रस्तः। अरुचिबीजं ज्ञानं विवेकज्ञानमिति पूर्वं स्वेन व्याख्यातम्। तच्चात्मीयं शास्त्रीयमेवेति विज्ञानपदेन पौनरुक्त्यम्। द्वितीयस्तु विशेषतस्तदनुभव इति भाष्यस्य निदिध्यासनपरत्वं व्याख्याय तदविरुद्धो बोद्धव्यः।"**[9] इति॥

अत्रैव च श्रीश्रीधरस्वामिना विज्ञानमित्यस्य **"विवेकज्ञानजम्"** इत्यर्थः कृतः। यथा-

**यद्वा ज्ञानं शास्त्राचार्योपदेशजम्, विज्ञानं निदिध्यासनजम्। तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत इति श्रुतेः।**[10] इति॥

इयं च प्रसंख्यानपदाभिधेयोपासनाध्यानभक्तिनिदिध्यासनशब्दैः आचार्यभगवत्पादशङ्करः नीलकण्ठः श्रीधनपतिश्च तत्र तत्र गीतायां व्यवहृत्य ब्रह्मसाक्षात्कारफलमिति वदन्ति। यथा-

- ध्यानं नाम शब्दादिभ्यो विषयेभ्यो श्रोत्रादीनि कारणानि मनस्युपसंहृत्य मनश्च प्रत्यक्चेतरितर्येकाग्रतया मच्चिन्तनं तद्ध्यानम्। तथा ध्यायतीव को ध्यायतीव पृथिवी ध्यायन्तीव पर्वता इत्युपमोपादानात् तैलधारावत् संततोऽविच्छिन्नप्रत्ययो ध्यानम्।[11]
- भक्तियोगेन तैलधारावदविच्छिन्नप्रवाहिमनः प्रवाहप्रणिधानरूपेण योगेन।[12]
- निदिध्यासनापरपर्यायेण ध्यानेनात्मनि बुद्धावात्मानं प्रत्यक्चेतनमात्मना ध्यानसंस्कृतेनान्तःकरणेन पश्यन्ति साक्षात् कुर्वन्ति।[13]

श्रीमण्डनमिश्रप्रभृतयः कथयन्ति यदुक्तविधेन प्रसंख्यानेनैव ब्रह्मसाक्षात्कारो भवितुमर्हति, नान्यथा। यतो हि शाब्दं ज्ञानम् परोक्षरूपम्, जागतिकः प्रपञ्चश्च प्रत्यक्षरूपः, अतोऽत्र परोक्षापरोक्षरूपयोः शाब्दज्ञानसंसारप्रपञ्चयोर्न कश्चन विरोधः। प्रसंख्यानापरपर्यायेणोपासनेन साक्षात् वृतात्मतत्त्वस्य प्रपञ्चेन सह विरोधः। तेन सन्नपि प्रपञ्चो बन्धाय दुःखाय वा न भवति। यथा सिंहोऽयं देवदत्त इत्यादि वाक्येषु समारोपितोऽपि सिहव्यवहारो भयाय न भवति। यथा- **"उच्यते परोक्षरूपं शाब्दज्ञानम्, प्रत्यक्षरूपः प्रपञ्चावभासः। तेन तयारविरोधेन प्रपञ्चावभासो नात्मासंस्पर्शी नाकिञ्चित्करः, न बन्धः। यथा प्रमाणान्तरादवसीयमानमाधुर्येऽपि द्रव्ये प्रत्यक्षरूप इन्द्रियद्वारस्तिक्तावभासः अद्रव्यसंस्पर्शी नाभासमात्रतयावतिष्ठते। तथा च द्रव्यं परमार्थतिक्तमिवानवसितमाधुर्यमिव दुःखाय भवति। उपासनादिना साक्षात्कृतात्मतत्त्वस्य तु विरोधात् सन्नपि प्रपञ्चावभासो नात्मसंस्पर्शी, देवदत्त इव सिहावभासः सिहो देवदत्त इति समारोपेऽवभासमानोऽपि तदसंस्पर्शी अकिञ्चित्करो न भयहेतुः। नित्यश्चात्मतत्त्वप्रकाशः तत्र न पुनविपर्ययावकाशोऽस्ति, शाब्दं तु प्रमाणाधीनं क्षणिकं ज्ञानम्, तत्र पुनरपि विपर्ययावकाशः, दृष्टं हि प्रमाणाननुसन्धाने पुनः सर्पभ्रान्त्या रज्जोर्भयम्"**[14]

प्रसंख्यापनपक्षं द्रढयन् पुनश्चेमे कथयन्ति यत् प्रमाणेन मिथ्यावभासा निवर्तन्ते; किन्तु कारणविशेषात् पुनरपि अनुवर्तन्ते। यथा देशान्तरे गते दिग्भ्रमो जायते, आप्तोपदेशाच्च निवर्ततेऽपि; किन्तु पुनरपि न कालान्तरे कारणवशात् पुनदिग्भ्रमो जायते, अर्थात् निवृत्तोऽदिग्भ्रमो जायते अर्थात् निवृत्तोऽदिग्भ्रमोऽनुवर्तते। परन्तु तत्र यदि आप्तोपदेशान्तरं पुनः पुनरभ्यासेन ज्ञानं दृढं क्रियते, तदा तत्र दिग्भ्रमो न जायते। एवमेव श्रुतिवचनेभ्यो ब्रह्मविज्ञाय प्रसंख्यानेन अर्थात् तत्त्वमस्यादिशब्दार्थान्वय व्यतिरेकयुक्तिविषयबुद्ध्याऽऽम्रेडनेन अर्थात् श्रुतिवाक्यजबोधाभ्यासेन ध्यानेनोपासनया वा मिथ्यावभासा निवर्तन्ते ब्रह्मसाक्षाक्रियते। यथा-

- "अत्रोच्यते निश्चितेऽपि प्रमाणात् तत्त्वे सर्वत्र मिथ्यावभासा निवर्तन्ते हेतुविशेषादनुवर्तन्तेऽपि यथा द्विचन्द्रादिदिग् विपर्यासादय आप्तवचनविनिश्चितदिक्चन्द्रतत्त्वानाम् तथा निर्विचिकित्सादाम्नापादवगतात्मतत्त्वस्यानादिमिथ्यादर्शनाभ्या सोपचितबलवत्संस्कारसामर्थ्यान् मिथ्यावभासानुवृत्तिस्तन्निवृत्तयेऽन्यदपेक्ष्यम्। तच्च तत्त्वदर्शनाभ्यासो लोकसिद्धः यज्ञादयश्च शब्दप्रमाणकाः, अभ्यासो हि संस्कारं द्रढयन् पूर्वसंस्कारं प्रतिबध्य स्वकार्यं सन्तनोति।"[15]
- तस्मात् तन्निवृत्तये विनिश्चितब्रह्मात्मभावेनापि साधानान्यपेक्ष्याणि।[16]
- एवं तर्हि शब्दात् प्रमिते ब्रह्मणि तत्साक्षात्करणायोपसनादिप्रवृतेः वेदान्तानां प्रामाण्यमिति भावः।[17]

एवंभूतं प्रसंख्यानं प्रसंख्यानफलं च ब्रह्मसिद्धिव्याख्यायां शङ्खपाणिरित्थं स्पष्टयति-**"किन्तु स्वरूपाविर्भावमात्रं मुक्तिरिति वर्णितम्। स्वरूपाविर्भावश्च शब्दात् परोक्षतयावगतस्याद्वयात्मनः साक्षाद्भावः। स चानुचिन्तनस्य भोजनस्येव तृप्तिदृष्टं फलम्, ज्ञानाभ्यासेन प्रकर्षदर्शनात्।"**[18]

भगवाञ्छङ्करस्तदनुयायिनश्च शब्दाज् ज्ञानानन्तरं ब्रह्मसाक्षात्काराय मध्ये प्रसङ्ख्यानं नाङ्गीकुर्वन्ति। ते कथयन्ति ब्रह्मविद्या सहकारिसाधनान्तरं विनैव ब्रह्मसाक्षात्कारे हेतुः।[19] इमं श्रीशङ्करसिद्धान्तं पोषयन् आचार्यश्रीसुरेश्वरः बृहदारण्यकोपनिषद्भाष्यवार्तिके श्रीमण्डनादिमतं दूषयति। **"विज्ञाय प्रज्ञां कुर्वीत"**[20] इति श्रुतेराशयमित्थं वर्णयति यत् तत्त्वमस्यादिवाक्यजज्ञानेन ब्रह्मयाथात्म्यमलब्ध्वा प्रज्ञां कुर्वीत केनेति व्यपेक्षायां विज्ञानेनेति लभ्यते। तस्माद् वाक्यजविज्ञानासाधननैरन्तर्येण ब्रह्मयाथात्म्यबोधिनीं प्रज्ञां कुर्वीत। यथा बृहदारण्यकभाष्यवार्तिके-

**अलब्धब्रह्मयाथात्म्यं ज्ञानं वाक्योद्भवं यतः।**
**तस्मात् प्रकुर्वीत साक्षाद् ब्रह्मैकगोचराम्॥**
**अपास्ताशेषसंसर्ग यथा ब्रह्माधिगम्यते।**
**केनेति च व्यपेक्षायां विज्ञानेनेति गम्यते॥**
**तस्माद् वाक्योत्थविज्ञानसाधनाभ्यासतोऽनिशम्।**
**प्रज्ञां कुर्यादसंसर्गिब्रह्मयाथात्म्यबोधिनीम्॥**
**अपेताशेषसंसर्गं तथैव ब्रह्म गम्यते।**
**यतोऽशेषतमोहन्त्री प्रज्ञा सैवात इष्यते॥**[21]
**अन्ये तु पण्डितम्मन्या सम्प्रदायानुसारतः।**
**विज्ञायेति वचः श्रौतमिदं व्याचक्षतेऽन्यथा॥**[22]
**इत्येवमादिवाक्यानि गम्भीरन्यायवेदिनः।**
**केचिद् व्याचक्षते यत्नादत्र प्रतिविधीयते॥**[23]

**इति व्याचक्षते केचिद् विज्ञायेति वचः स्फुटम्।**
**महामीमांसका धीरा अत्र प्रतिविधीयते॥**[24]
**आवृत्तिश्च प्रसंख्यानं कुर्यात्सातिशयं कथम्।**
**न ह्यावृत्ती प्रमाणस्य प्रमेयेऽतिशयो यतः॥**[25]
**निराकुर्यात् प्रसंख्यानं दुःखित्वं चेत्स्वनुष्ठितम्।**
**प्रत्यक्षादिविरुद्धत्वात् कषमुत्पादयेत् प्रमाम्॥**[26]
**एवं त्तत्त्वमसीत्यस्माद् द्वैतनुत् प्रत्यगात्मनि।**
**सम्यग् ज्ञातव्यमर्थस्य जायेतैव प्रमा दृढा॥**[27]**इति॥**

श्रीधनपतिपण्डितेन शाङ्करभाष्यानुसारिणि स्वीये गीताभाष्योत्कर्षे उपासनापरपर्यायस्य प्रसंख्यानस्य ब्रह्मसाक्षात्काराय अकिञ्चित्करत्वमुक्तम्। तेनोक्तं यदुपासना अतस्मिन् तद्बुद्धिः भ्रमरूपा यथा शालग्रामशिलायां विष्णुवुद्धिः। अतो ये सूत्रविराडन्तर्यामिषु आत्मबुद्धिं कृत्वा उपासते, तेन यथार्थविदः। यथा- **"उपासना हि नाम अतस्मिन् तद्बुद्धिः। यथा शालग्रामे विष्णुबुद्धिरेवं सूत्रविराडन्तर्यामिष्वात्मबुद्धिरिति न तद्वन्तः सुनिश्चितार्था इति वक्तुं शक्यम्।"**[28]

एवं च प्रसङ्ख्यानपक्षं श्रीशङ्करश्रीमण्डनमिश्रश्रीसुरेश्वराचार्यश्रीमदानन्दगिरिप्रभृतयो निराकुर्वन्ति। किन्तु एतद् विपरीतं ब्रह्मसूत्रकारश्रीबादरायणश्रीवाचस्पतिमिश्रकल्पतरुकारश्रीमदमलानन्दधीमधुसूदनसरस्वतीप्रभृतयः प्रसंख्यानपक्षं समाद्रियन्त इति प्रतीयते। यथा बादरायणाचार्यः **"अपि च संराधने प्रत्यक्षानुमानाभ्याम्"**[29] सूत्रितवान्। अत्र संराधनम् आराधनम् प्रसंख्यानमुपासनं वार्थः। श्रीमदमलानन्दः **"प्राणस्तथानुगमात्"**[30] इति ब्रह्मसूत्रभाष्यभामतीव्याख्याने कल्पतरौ स्पष्टं कथयति यद् श्रीवाचस्पतिमिश्रः ध्यानजं ब्रह्मसाक्षात्कारं स्वीकरोति। एतदर्थमुपासनामभिप्रैति। यथा-

**ध्यानजसाक्षात्काराभ्युपगमो वाचस्पतेरेतत्सूत्रार्थबोधादिति कैश्चिदयुक्तमुक्तम्-**
**अपि संराधने सूत्राच्छास्त्रार्थध्यानजा प्रमा।**
**शास्त्रदृष्टिर्मता तां तु वेत्ति वाचस्पतिः परम्॥**[31]

**अत्रैवेदमप्युक्तम्- तस्य प्राणस्य प्रज्ञात्मना सहोपास्यत्वमुक्तमित्यर्थः। ब्रह्मणि प्राण इति। स एष प्राणोऽजरम् इत्यत्र प्राणशब्दो ब्रह्मवाचीत्यर्थः।**[32]**इति॥**

एवमेव श्रीनीलकण्ठश्चतुर्धुरीणः श्रीमद्भगवद्गीतायां स्वीयटीकायामुक्तं यद् अमलानन्दो वेदान्तवाक्यजभावनया ब्रह्मसाक्षात्क्रियत इत्यङ्गीकरोति।[33] श्रीमधुसूदनसरस्वती तु स्पष्टतया न कुत्राप्युपलक्षितो यदयं प्रसंख्यानपक्षपाती। किन्त्वस्य हार्दैः श्लोकैर्वाक्यैश्चेत्थं प्रतीयते यदयं प्रसंख्यानमाद्रियते। यथा-

**यद्भक्तिं न विना मुक्तिर्यः सेव्यः सर्वयोगिनाम्।**
**तं वन्दे परमानन्दधनं श्रीनन्दनन्दनम्॥**[34]

**ध्यानाभ्यासवशीकृतेन मनसा यन्निर्गुणं निष्क्रियं**
**ज्योतिः किंचन योगिनो यदि परं पश्यन्ति पश्यन्तु ते।**
**अस्माकं तु तदेव लोचनचमत्काराय भूयाच्चिरम्**
**कालिन्दीपुलिनोदरे किमपि यन्नीलं महो धावति॥**[35]
**पराकृतनमद् बन्धं परं ब्रह्म नराकृति।**
**सौन्दर्यसारसर्वस्वं वन्दे नन्दात्मजं महः॥**[36]
**वंशीविभूषितकरान्नवनीरदाभात्**
**पीताम्बरादरुण विम्बफलाधरोष्ठात्।**
**पूर्णेन्दुसुन्दरमुखादरविन्दनेत्रात्**
**कृष्णात् परं किमपि तत्त्वमहं ज जाने॥**[37]इति॥

श्रीश्रीधरस्वामिभिर्गीताशास्त्रस्यान्ते उपसंहारे एवंभूतस्य भक्त्यपरपर्यायस्य प्रसंख्यानस्य ज्ञानस्य चातीव युक्तिसहं सामञ्जस्यं प्रकाशितम्। तैरुच्यते यज् ज्ञानानन्तरं भक्तिर्जायते भक्तेश्च मुक्तिर्भवति। ज्ञानात् मोक्ष इति सिद्धान्तो भक्त्यवान्तरव्यापारं न वारयति। यथा काष्ठैः पचति इत्यत्रावान्तरव्यापारं ज्वलनं न निवार्यते। तथैव विज्ञाय प्रज्ञां कुर्वीत इत्यत्र ब्रह्मविज्ञानानन्तरं प्रज्ञाम् उपासनाम् अवान्तरव्यापारं कुर्वीत। ततो मोक्ष इति। यथा- **"तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽमनाय इत्यादि श्रुतिविरोधः शङ्कनीयः। भक्त्यवान्तरव्यापारत्वाद् ज्ञानस्य। नहि काष्ठः पचति इत्युक्ते ज्वालानामसाधनमुक्तं भवति। कि च यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता हार्थाः प्रकाशन्ते महात्मनाम्। देहान्ते देवः परं ब्रह्म व्याचष्टे॥ यमेवैष वृणुते तेन लभ्यः नान्येनेति समञ्जसानि भवन्ति। तस्माद् भक्तिरेव मोक्षहेतुरिति सिद्धम्।"**[38]

मन्ये, इमामेव श्रीश्रीधरोक्ति मनसि निधाय श्रीधनपतिपण्डितेन श्रीशाङ्करभाष्यानुसारिणि स्वीये भाष्योत्कर्षे व्याख्याने गीताशास्त्रस्यान्ते उपसंहारे एवमुच्यते यद् यदि मुक्तये ज्ञानानन्तरमवान्तरसाधने भक्तिः स्वीक्रियते, तदा कर्मैव साक्षान्मोक्षसाधनं भवतु, भक्तिर्ज्ञानं चावान्तरव्यापारो भवतु। अतो ज्ञानानन्तरं मुक्तये भक्तिरवान्तरव्यापारो मा भवत्विति। यथा-

- तत्त्वसाक्षात् केवलादन्यनिरपेक्षान् मोक्ष इति गीताशास्त्रार्थसंग्रहः।[39]
- अज्ञानपरिकल्पितस्य संसारस्य ज्ञानेनैव निवृत्तिर्युक्ता, न तु कर्मणा/उपास्तिक्रियया वा। तथासति मोक्षस्यानित्यत्वं सातिशयत्वं च प्रसज्येत इत्यन्यत्र विस्तरः। ......अवान्तरव्यापारकल्पनायां स्वकर्मणा समभ्यर्च्य सिद्धिं विन्दति मानवः इत्युक्तत्वात् कर्मैव साक्षाद् मोक्षसाधनं भक्तिर्ज्ञानं चावान्तरव्यापारः कुतौ न स्यादित्यास्तां तावत्।[40]

अत्र गीतोपसंहारे श्रीमधुसूदनसरस्वती च कोऽहं वराकः श्रीमद्भगवद्वाक्याशयं यथार्थं वर्णयितुं शक्त इति वदन् मौनमाधत्त।

**निष्कर्षः-** एवञ्च परस्परविरोधे यदि प्रज्ञापरपर्यायस्योपासनापरपर्यायस्य वा भक्तिशब्दस्यार्थो ज्ञानं विवेकज्ञानं वा स्वीकुर्यात्।

सामान्यतोऽयमर्थोन स्वीक्रियते; किन्तु भगवता श्रीशङ्करेण[41] श्रीधनपतिपण्डितेन च तथार्थो गीताशास्त्रे इत्यत्र स्वीकृतस्तदा श्रुतिवाक्येभ्यः सामान्यतो ब्रह्मज्ञानान्तरं प्रज्ञया ध्यानापरपर्यायेण निदिध्यासने ब्रह्म साक्षात्क्रियत इत्यर्थस्तात्पर्यं वा क्रियात् तदा श्रीशङ्कराचार्यश्रीमण्डनमिश्रप्रभृतीनां प्रसंख्यानविषये यथाकथञ्चित् सामञ्जस्यं सम्भवेत्। इति॥

**सन्दर्भग्रन्थसूची-**

छान्दोग्योपनिषत्

बृहदारण्यकोपनिषत्

बृहदारण्यकभाष्यवार्तिकम्

श्रीमद्भगवद्गीता

नैष्कर्म्यसिद्धिः

ब्रह्मसिद्धिः

ब्रह्मसूत्रम् शाङ्करभाष्यसहितम्

श्रीमद्भगवद्गीता शाङ्करभाष्यानुसारिणी अष्टटीकायुक्ता

**पाद टिप्पणी -**

1. छान्दोग्योपनिषत् ६/८/७
2. बृहदारण्यकोपनिषत् ४/४/२१
3. ब्रह्मसिद्धिः नि.का. आदौ
4. बृहदारण्यकभाष्यवार्तिकम्- सं.वा.
5. नैष्कर्म्यसिद्धिः ३/९०
6. त० ३।८९
7. ४/२९
8. श्रीमद्भगवद्गीता ३/४१
9. गीतायाः ३/४१ भाष्योत्कर्षे
10. गीतायाः ३/४१ श्रीधर्याम्
11. गीता १३/२४ शा० भाष्ये
12. गी० १४/२६ नीलकण्ठीटीकायाम्
13. गीता १३/२४ भाष्योत्कर्षे
14. ब्रह्मसिद्धिः नि० का० १०९ का० १० १३४
15. ब्रह्मसिद्धिःब्र० का० २ का० पृ० ३५
16. तत्रैव पृ० ३५
17. ब्रह्मसिद्धिः सि० का० ११ का० शङ्खपाणिव्याख्या पृ० १५९
18. ब्रह्मसिद्धिः नि० का० १८२ का० शङ्खपाणिव्याख्या पृ० १५४
19. विद्यायाश्च स्वातन्त्र्यात्। स्वतन्त्रा हि ब्रह्मविद्या सहकारिसाधनान्तरनिरपेक्षा पुरुषार्थसाधनेति च। बृहदारण्यकोपनिषत् शा० भा० ४।३।१ पृ० ५४५ पूनाप्रका०
20. बृहदारण्यकोपनिषत् ४/४/२१
21. बृहदारण्यकोपनिषत् भा० वा० ८०१-८०८ पृ. १८५३ पूनाप्रका०
22. तत्रैव ४।४।७९६ पृ, १८५२
23. तत्रैव ४।४।८१ पृ. १८५३
24. तत्रैव ४।४।८९१ १० १८६६
25. तत्रैव सं० का० ८१८ पृ० २२५
26. नैष्कर्म्यसिद्धिः ३।८९ पृ० १६०
27. नैष्कर्म्यसिद्धिः ३।७०
28. श्रीमद्भगवद्गीतायाम् ८।५ श्लोके नीलकण्ठीटीकायाम्
29. ब्रह्मसूत्रम् ३/२/२४
30. ब्रह्मसूत्रम् १/१/२८
31. ब्रह्मसूत्रम् १।१।२७ क० त०
32. ब्रह्मसूत्रम् १/१/२८ क० त०
33. कल्पद्रुमाचार्यास्तु वेदान्तवाक्यजध्यानभावनाऽपरोक्षधीः। (श्री० भ० गी० १३।२५ नी० क०)
34. श्री० भ० गी० सप्तमाध्यायान्ते श्री म० सू० स०
35. तत्रैव त्रयोदशाध्यायस्यादौ
36. तत्रैव चतुर्दशाध्यायान्ते
37. तत्रैव पञ्चदशाध्यायान्तेऽष्टदशाध्यायान्ते च
38. गीताशास्त्रान्ते उपसंहारे श्रीश्रीधरस्वामी
39. गीताशास्त्रान्ते उपसंहारे भाष्योत्कर्षे
40. गीताशास्त्रान्ते उपसंहारे भाष्योत्कर्षे
41. **भक्तिं ज्ञानलक्षणाम्** (गी० १८।५५ श्रीशङ्कराचार्यः)
   **भक्तिः वृत्तिसंततिरूपा** (गी० ७।१७ भाष्योत्कर्षे)
   **प्रज्ञां निदिध्यासनम्** (गी० ३।४१ भाष्योत्कर्षे श्रीधर्यां च)
   **निदिध्यासनापरपर्यायेण ध्यानेन** (गी० १३।२४ भाष्योत्कर्षे) **ध्यानं नाम एकाग्रतया मच्चिन्तनं तद्ध्यानम्** (गी० १३।२४ शा० भा०)
   **भक्तियोगेन विवेकज्ञानात्मकेन भक्तियोगेन** (गी० १४।२६ शा० भा०)
   **निदिध्यासनसंज्ञकेन ध्यानेन विषयीकुर्वन्तीत्यर्थः** (गी० १२।३ म० सू० स०)
   **विषयीकरणेन सामीप्यमुपगम्य तैलधारावत्समानप्रत्यय-प्रवाहेण दीर्घकालं यदासनं तदुपासनम्** (गी० १२।३ शा. भा.)